श्रीभगवानुवाच
**The Blessed Lord said,**
śrī-bhagavān uvāca

भूय एव महाबाहो
**O Arjuna, once again**
bhūya eva mahā-bāho

शृणु मे परमं वचः
**listen to My highest teaching.**
śṛṇu me paramaṁ vacaḥ

यत्तेऽहं प्रीयमाणाय
**Because you are dear, unto you I**
yat te ’haṁ prīyamāṇāya

वक्ष्यामि हितकाम्यया
**will teach what is helpful.**
vakṣyāmi hita-kāmyayā 10.1

न मे विदुः सुरगणाः
**The gods do not know My**
na me viduḥ sura-gaṇāḥ

प्रभवं न महर्षयः
**origin, nor do the great sages.**
prabhavaṁ na maharṣayaḥ

अहमादिर्हि देवानां
**Indeed, I am the source of those gods**
aham ādir hi devānāṁ

महर्षीणां च सर्वशः
**and all the great sages.**
maharṣīṇāṁ ca sarvaśaḥ 10.2

यो मामजमनादिं च
**Knowing Me as the unborn, eternal,**
yo mām ajam anādiṁ ca

वेत्ति लोकमहेश्वरम्
**Lord of the world,**
vetti loka-maheśvaram

असम्मूढः स मर्त्येषु
**one is free from delusion. Among mortals**
asammūḍhaḥ sa martyeṣu

सर्वपापैः प्रमुच्यते
**he is free from all sins.**
sarva-pāpaiḥ pramucyate 10.3

बुद्धिर्ज्ञानमसम्मोहः
**Intelligence, wisdom, freedom from delusion,**
buddhir jñānam asammohaḥ

क्षमा सत्यं दमः शमः
**patience, truth, self-control, tranquility,**
kṣamā satyaṁ damaḥ śamaḥ

सुखं दुःखं भवोऽभावो
**happiness, suffering, birth, death,**
sukhaṁ duḥkhaṁ bhavo ’bhāvo

भयं चाभयमेव च
**fear, fearlessness,**
bhayaṁ cābhayam eva ca 10.4

अहिंसा समता तुष्टिस्
**Harmlessness, impartiality, contentment,**
ahiṁsā samatā tuṣṭis

तपो दानं यशोऽयशः
**austerity, charity, fame, infamy,**
tapo dānaṁ yaśo ’yaśaḥ

भवन्ति भावा भूतानां
**for beings, these attributes arise**
bhavanti bhāvā bhūtānāṁ

मत्त एव पृथग्विधाः
**from Me alone, variously.**
matta eva pṛthag-vidhāḥ 10.5

महर्षयः सप्त पूर्वे
**The first seven great sages**
maharṣayaḥ sapta pūrve

चत्वारो मनवस्तथा
**and the four progenitors**
catvāro manavas tathā

मद्भावा मानसा जाता
**were born from My mind.**
mad-bhāvā mānasā jātā

येषां लोक इमाः प्रजाः
**All people arose from them.**
yeṣāṁ loka imāḥ prajāḥ 10.6

एतां विभूतिं योगं च
**My glory and power –**
etāṁ vibhūtiṁ yogaṁ ca

मम यो वेत्ति तत्त्वतः
**one who knows truly**
mama yo vetti tattvataḥ

सोऽविकम्पेन योगेन
**with steadfast yoga,**
so ’vikampena yogena

युज्यते नात्र संशयः
**is certainly endowed.**
yujyate nātra saṁśayaḥ 10.7

अहं सर्वस्य प्रभवो
**I am the origin of all.**
ahaṁ sarvasya prabhavo

मत्तः सर्वं प्रवर्तते
**From Me, everything arose.**
mattaḥ sarvaṁ pravartate

इति मत्वा भजन्ते मां
**Knowing this, people worship Me**
iti matvā bhajante māṁ

बुधा भावसमन्विताः
**being wise and devoted.**
budhā bhāva-samanvitāḥ 10.8

मच्चित्ता मद्गतप्राणा
**Thinking of Me, living for Me,**
mac-cittā mad-gata-prāṇā

बोधयन्तः परस्परम्
**teaching one another,**
bodhayantaḥ parasparam

कथयन्तश्च मां नित्यं
**always talking about Me,**
kathayantaś ca māṁ nityaṁ

तुष्यन्ति च रमन्ति च
**they are content and joyful.**
tuṣyanti ca ramanti ca 10.9

तेषां सततयुक्तानां
**Unto those who are steadfast,**
teṣāṁ satata-yuktānāṁ

भजतां प्रीतिपूर्वकम्
**worshiping with love,**
bhajatāṁ prīti-pūrvakam

ददामि बुद्धियोगं तं
**I give them wisdom**
dadāmi buddhi-yogaṁ taṁ

येन मामुपयान्ति ते
**through which they come to Me.**
yena mām upayānti te 10.10

तेषामेवानुकम्पार्थम्
**Out of compassion,**
teṣām evānukampārtham

अहमज्ञानजं तमः
**the darkness of ignorance**
aham ajñānajaṁ tamaḥ

नाशयाम्यात्मभावस्थो
**I remove, dwelling within**
nāśayāmy ātma-bhāvastho

ज्ञानदीपेन भास्वता
**as the shining lamp of knowledge.**
jñāna-dīpena bhāsvatā 10.11

अर्जुन उवाच
**Arjuna said,**
arjuna uvāca

परं ब्रह्म परं धाम
**Supreme brahman, supreme abode,**
paraṁ brahma paraṁ dhāma

पवित्रं परमं भवान्
**and supreme purifier are You,**
pavitraṁ paramaṁ bhavān

पुरुषं शाश्वतं दिव्यम्
**the eternal divine being,**
puruṣaṁ śāśvataṁ divyam

आदिदेवमजं विभुम्
**foremost God, unborn and all-pervasive.**
ādi-devam ajaṁ vibhum 10.12

आहुस्त्वामृषयः सर्वे
**Thus all the sages describe You,**
āhus tvām ṛṣayaḥ sarve

देवर्षिर्नारदस्तथा
**also divine sages like Narada,**
devarṣir nāradas tathā

असितो देवलो व्यासः
**Asita, Devala, and Vyasa.**
asito devalo vyāsaḥ

स्वयं चैव ब्रवीषि मे
**You, too, describe Yourself to me.**
svayaṁ caiva bravīṣi me 10.13

सर्वमेतद् ऋतं मन्ये
**All this I accept as true,**
sarvam etad ṛtaṁ manye

यन्मां वदसि केशव
**as You have told me, O Krishna.**
yan māṁ vadasi keśava

न हि ते भगवन् व्यक्तिं
**O Lord, Your manifestation**
na hi te bhagavan vyaktiṁ

विदुर्देवा न दानवाः
**not even gods and demons know.**
vidur devā na dānavāḥ 10.14

स्वयमेवात्मनात्मानं
**You alone, by Yourself, truly**
svayam evātmanātmānaṁ

वेत्थ त्वं पुरुषोत्तम
**know Yourself, O Lord,**
vettha tvaṁ puruṣottama

भूतभावन भूतेश
**Creator, Lord of creatures,**
bhūta-bhāvana bhūteśa

देवदेव जगत्पते
**God of gods and Lord of the world.**
deva-deva jagat-pate 10.15

वक्तुमर्हस्यशेषेण
**Please completely describe**
vaktum arhasy aśeṣeṇa

दिव्या ह्यात्मविभूतयः
**Your divine glories.**
divyā hy ātma-vibhūtayaḥ

याभिर्विभूतिभिर्लोकान्
**With those glories, the worlds**
yābhir vibhūtibhir lokān

इमांस्त्वं व्याप्य तिष्ठसि
**You pervade and abide therein.**
imāṁs tvaṁ vyāpya tiṣṭhasi 10.16

कथं विद्यामहं योगिंस्
**O great yogi, how can I know**
kathaṁ vidyām ahaṁ yogiṁs

त्वां सदा परिचिन्तयन्
**You and always think about You?**
tvāṁ sadā paricintayan

केषु केषु च भावेषु
**In which forms**
keṣu keṣu ca bhāveṣu

चिन्त्योऽसि भगवन्मया
**should I contemplate on You, O Lord?**
cintyo ’si bhagavan mayā 10.17

विस्तरेणात्मनो योगं
**The extent of Your power**
vistareṇātmano yogaṁ

विभूतिं च जनार्दन
**and glory, O Krishna,**
vibhūtiṁ ca janārdana

भूयः कथय तृप्तिर्हि
**tell me again, because**
bhūyaḥ kathaya tṛptir hi

शृण्वतो नास्ति मेऽमृतम्
**I am not yet satisfied hearing this.**
śṛṇvato nāsti me ’mṛtam 10.18

श्रीभगवानुवाच
**The Blessed Lord said,**
śrī-bhagavān uvāca

हन्त ते कथयिष्यामि
**Dear one, I will tell you**
hanta te kathayiṣyāmi

दिव्या ह्यात्मविभूतयः
**My divine glories,**
divyā hy ātma-vibhūtayaḥ

प्राधान्यतः कुरुश्रेष्ठ
**but only the most prominent**
prādhānyataḥ kuru-śreṣṭha

नास्त्यन्तो विस्तरस्य मे
**because My extent is limitless.**
nāsty anto vistarasya me 10.19

अहमात्मा गुडाकेश
**O Arjuna, I am the Self**
aham ātmā guḍākeśa

सर्वभूताशयस्थितः
**abiding in all beings.**
sarva-bhūtāśaya-sthitaḥ

अहमादिश्च मध्यं च
**I am the beginning, middle,**
aham ādiś ca madhyaṁ ca

भूतानामन्त एव च
**and end of all beings.**
bhūtānām anta eva ca 10.20

आदित्यानामहं विष्णुर्
**Among Adityas, I am Vishnu.**
ādityānām ahaṁ viṣṇur

ज्योतिषां रविरंशुमान्
**Among lights, I am the shining sun.**
jyotiṣāṁ ravir aṁśumān

मरीचिर्मरुतामस्मि
**Among Maruts, I am Marici.**
marīcir marutām asmi

नक्षत्राणामहं शशी
**Among stars, I am the moon.**
nakṣatrāṇām ahaṁ śaśī 10.21

वेदानां सामवेदोऽस्मि
**Among Vedas, I am the Sama.**
vedānāṁ sāma-vedo ’smi

देवानामस्मि वासवः
**Among gods, I am the Vasus.**
devānām asmi vāsavaḥ

इन्द्रियाणां मनश्चास्मि
**Among senses, I am the mind.**
indriyāṇāṁ manaś cāsmi

भूतानामस्मि चेतना
**Among creatures, I am awareness.**
bhūtānām asmi cetanā 10.22

रुद्राणां शङ्करश्चास्मि
**Among Rudras, I am Shiva.**
rudrāṇāṁ śaṅkaraś cāsmi

वित्तेशो यक्षरक्षसाम्
**Among spirits, I am the god of wealth.**
vitteśo yakṣa-rakṣasām

वसूनां पावकश्चास्मि
**Among Vasus, I am Pavaka.**
vasūnāṁ pāvakaś cāsmi

मेरुः शिखरिणामहम्
**Among mountains, I am Meru.**
meruḥ śikhariṇām aham 10.23

पुरोधसां च मुख्यं मां
**Among priests, as the chief,**
purodhasāṁ ca mukhyaṁ māṁ

विद्धि पार्थ बृहस्पतिम्
**Brihaspati, know Me, O Arjuna.**
viddhi pārtha bṛhaspatim

सेनानीनामहं स्कन्दः
**Among warriors, I am Skanda.**
senānīnām ahaṁ skandaḥ

सरसामस्मि सागरः
**Among waters, I am the sea.**
sarasām asmi sāgaraḥ 10.24

महर्षीणां भृगुर् अहं
**Among great sages, I am Bhrigu.**
maharṣīṇāṁ bhṛgur ahaṁ

गिरामस्म्येकमक्षरम्
**Among words, I am the syllable om.**
girām asmy ekam akṣaram

यज्ञानां जपयज्ञोऽस्मि
**Among sacrifices, I am japa.**
yajñānāṁ japa-yajño ’smi

स्थावराणां हिमालयः
**Among the unmoving, I am the Himalayas.**
sthāvarāṇāṁ himālayaḥ 10.25

| | |
|---|---|
| अश्वत्थः सर्ववृक्षाणां<br>**Among all trees, I am the Ashvattha.**<br>aśvatthaḥ sarva-vṛkṣāṇāṁ<br><br>देवर्षीणां च नारदः<br>**Among divine sages, I am Narada.**<br>devarṣīṇāṁ ca nāradaḥ<br><br>गन्धर्वाणां चित्ररथः<br>**Among Gandharvas, I am Citraratha.**<br>gandharvāṇāṁ citrarathaḥ<br><br>सिद्धानां कपिलो मुनिः<br>**Among siddhas, I am the sage Kapila.**<br>siddhānāṁ kapilo muniḥ 10.26 | उच्चैःश्रवसमश्वानां<br>**Among horses, as Uccaishravas,**<br>uccaiḥśravasam aśvānāṁ<br><br>विद्धि माममृतोद्भवम्<br>**born of the sea, know Me.**<br>viddhi mām amṛtodbhavam<br><br>ऐरावतं गजेन्द्राणां<br>**Among great elephants, I am Airavata.**<br>airāvataṁ gajendrāṇāṁ<br><br>नराणां च नराधिपम्<br>**Among men, I am king.**<br>narāṇāṁ ca narādhipam 10.27 |
| आयुधानामहं वज्रं<br>**Among weapons, I am the thunderbolt.**<br>āyudhānām ahaṁ vajraṁ<br><br>धेनूनामस्मि कामधुक्<br>**Among cows, I am the wish-fulfilling cow.**<br>dhenūnām asmi kāmadhuk<br><br>प्रजनश्चास्मि कन्दर्पः<br>**Among procreators, I am Kandarpa.**<br>prajanaś cāsmi kandarpaḥ<br><br>सर्पाणामस्मि वासुकिः<br>**Among snakes, I am Vasuki.**<br>sarpāṇām asmi vāsukiḥ 10.28 | अनन्तश्चास्मि नागानां<br>**Among serpents, I am Ananta.**<br>anantaś cāsmi nāgānāṁ<br><br>वरुणो यादसामहम्<br>**Among waters, I am Varuna.**<br>varuṇo yādasām aham<br><br>पितॄणामर्यमा चास्मि<br>**Among ancestors, I am Aryama.**<br>pitṝṇām aryamā cāsmi<br><br>यमः संयमतामहम्<br>**Among conquerers, I am Yama.**<br>yamaḥ saṁyamatām aham 10.29 |

प्रह्लादश्चास्मि दैत्यानां
**Among Daityas, I am Prahlada.**
prahlādaś cāsmi daityānāṁ

कालः कलयतामहम्
**Among measures, I am time.**
kālaḥ kalayatām aham

मृगाणां च मृगेन्द्रोऽहं
**Among animals, I am the lion.**
mṛgāṇāṁ ca mṛgendro ’haṁ

वैनतेयश्च पक्षिणाम्
**Among birds, I am Garuda.**
vainateyaś ca pakṣiṇām 10.30

पवनः पवतामस्मि
**Among purifiers, I am the wind.**
pavanaḥ pavatām asmi

रामः शस्त्रभृतामहम्
**Among weapon-bearers, I am Rama.**
rāmaḥ śastra-bhṛtām aham

झषाणां मकरश्चास्मि
**Among fish, I am the crocodile.**
jhaṣāṇāṁ makaraś cāsmi

स्रोतसामस्मि जाह्नवी
**Among rivers, I am the Ganga.**
srotasām asmi jāhnavī 10.31

सर्गाणामादिरन्तश्च
**Creation's beginning, end,**
sargāṇām ādir antaś ca

मध्यं चैवाहमर्जुन
**and middle am I, O Arjuna.**
madhyaṁ caivāham arjuna

अध्यात्मविद्या विद्यानां
**Among teachings, I am Self-knowledge.**
adhyātma-vidyā vidyānāṁ

वादः प्रवदतामहम्
**Among disputants, I am speech.**
vādaḥ pravadatām aham 10.32

अक्षराणां अकारोऽस्मि
**Among letters, I am "a".**
akṣarāṇāṁ a-kāro ’smi

द्वन्द्वः सामासिकस्य च
**Among compound words, I am the dvandva.**
dvandvaḥ sāmāsikasya ca

अहमेवाक्षयः कालो
**I am undecaying time.**
aham evākṣayaḥ kālo

धाताहं विश्वतोमुखः
**I am the all-knowing creator.**
dhātāhaṁ viśvato-mukhaḥ 10.33

मृत्युः सर्वहरश्चाहम्
**I am death, destroyer of all.**
mṛtyuḥ sarva-haraś cāham

उद्भवश्च भविष्यताम्
**I am birth for future beings.**
udbhavaś ca bhaviṣyatām

कीर्तिः श्रीर्वाक् च नारीणां
**Among the feminine, I am fame, wealth, speech,**
kīrtiḥ śrīr vāk ca nārīṇāṁ

स्मृतिर्मेधा धृतिः क्षमा
**memory, intelligence, courage and patience.**
smṛtir medhā dhṛtiḥ kṣamā 10.34

बृहत्साम तथा साम्नां
**Among hymns, I am the Brihat Saman.**
bṛhat-sāma tathā sāmnāṁ

गायत्री छन्दसामहम्
**Among poetic meters, I am the Gayatri.**
gāyatrī chandasām aham

मासानां मार्गशीर्षोऽहम्
**Among months, I am Margashirsha.**
māsānāṁ mārga-śīrṣo ’ham

ऋतूनां कुसुमाकरः
**Among seasons, I am spring.**
ṛtūnāṁ kusumākaraḥ 10.35

द्यूतं छलयतामस्मि
**Among treacheries, I am gambling.**
dyūtaṁ chalayatām asmi

तेजस्तेजस्विनामहम्
**I am the brilliance of the bright.**
tejas tejasvinām aham

जयोऽस्मि व्यवसायोऽस्मि
**I am victory. I am resolve.**
jayo ’smi vyavasāyo ’smi

सत्त्वं सत्त्ववतामहम्
**I am the goodness of the good.**
sattvaṁ sattvavatām aham 10.36

वृष्णीनां वासुदेवोऽस्मि
**Among Vrishnis, I am Krishna.**
vṛṣṇīnāṁ vāsudevo ’smi

पाण्डवानां धनञ्जयः
**Among Pandavas, I am Arjuna.**
pāṇḍavānāṁ dhanañjayaḥ

मुनीनामप्यहं व्यासः
**Among sages, I am Vyasa.**
munīnām apy ahaṁ vyāsaḥ

कवीनामुशना कविः
**Among poets, I am Ushana.**
kavīnām uśanā kaviḥ 10.37

दण्डो दमयतामस्मि
**For wardens, I am punishment.**
daṇḍo damayatām asmi

नीतिरस्मि जिगीषताम्
**For seekers of victory, I am law.**
nītir asmi jigīṣatām

मौनं चैवास्मि गुह्यानां
**I am the silence of secrets.**
maunaṁ caivāsmi guhyānāṁ

ज्ञानं ज्ञानवतामहम्
**I am the wisdom of the wise.**
jñānaṁ jñānavatām aham 10.38

यच्चापि सर्वभूतानां
**And for all beings,**
yac cāpi sarva-bhūtānāṁ

बीजं तदहमर्जुन
**I am the seed, O Arjuna.**
bījaṁ tad aham arjuna

न तदस्ति विना यत्स्यान्
**Without Me, nothing could exist,**
na tad asti vinā yat syān

मया भूतं चराचरम्
**sentient or insentient.**
mayā bhūtaṁ carācaram 10.39

नान्तोऽस्ति मम दिव्यानां
**There is no limit to My divine**
nānto ’sti mama divyānāṁ

विभूतीनां परन्तप
**glories, O Arjuna.**
vibhūtīnāṁ parantapa

एष तूद्देशतः प्रोक्तो
**This much was told as an example**
eṣa tūddeśataḥ prokto

विभूतेर्विस्तरो मया
**of My vast glories.**
vibhūter vistaro mayā 10.40

यद्यद्विभूतिमत् सत्त्वं
**Whatever glories exist,**
yad yad vibhūtimat sattvaṁ

श्रीमदूर्जितमेव वा
**valuable or powerful...**
śrīmad ūrjitam eva vā

तत्तदेवावगच्छ त्वं
**...understand that they**
tat tad evāvagaccha tvaṁ

मम तेजोऽंशसम्भवम्
**arise from a fraction of My splendor.**
mama tejo’ṁśa-sambhavam 10.41

अथवा बहुनैतेन
**But, of all this elaboration,**
athavā bahunaitena

किं ज्ञातेन तवार्जुन
**what's the use, O Arjuna?**
kiṁ jñātena tavārjuna

विष्टभ्याहमिदं कृत्स्नम्
**I established the entire universe**
viṣṭabhyāham idaṁ kṛtsnam

एकांशेन स्थितो जगत्
**with just a fraction of My glories.**
ekāṁśena sthito jagat 10.42